श्रीः

श्रीमते निगमान्त महादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीमद्रहस्यत्रयसार पॆरिय तनियन्गाळ् ॥

(आण्डवन् आश्रमम् तनियन्गाळ्)

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using skt, LaTeX, Itrans, **skt** and the **xdvng** font. Our sincere thanks to Sri. Sundar Varadarajan of California and Sri. Sriram Ramanujan of Virginia, USA, for proofreading this document.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीमद्रहस्यत्रयसार पॆरिय तनियन्गऴ् ॥

श्रीमद्वेदान्तरामानुजयतिकृपयारङ्गिणि न्यस्तभारं
तत्सम्प्राप्तागमान्तद्वितयमनुगणं शिष्टतापूर्णमग्र्यम्।
श्रेष्ठश्रीरङ्गरामानुजमुनिकरुणालब्धमोक्षाश्रमं तं
सत्त्वस्थं श्रीवराहं यतिवरमनघं देशिकं संश्रयामि॥ १ ॥

वेदान्त लक्ष्मण मुनीन्द्र कृपात्त बोधम्
तत्पाद युग्मसरसीरुह भृङ्गराजम्।
त्रय्यन्त युग्म कृतभूरि परिश्रमं तं
श्रीरङ्गलक्ष्मण मुनिं शरणं प्रपद्ये॥ २ ॥

श्रीमच्छ्रीवासयोगीश्वर मुनिकरुणालब्ध वेदान्तयुग्मं
श्रीमद्वेदान्तरामानुजगुरुपदयोरर्पित स्वात्मभारम्।
श्रीमच्छ्रुत्यन्तरामानुजयतिनृपतेः प्राप्तमोक्षाश्रमं तं
श्रीमच्छ्रीवासरामानुजमुनिमपरं संश्रये ज्ञानवार्द्धिम्॥ ३ ॥

श्रीमद्वेदान्तरामानुजमुनिकरुणालब्ध वेदान्तयुग्मं
श्रीमच्छ्रीवासयोगीश्वर गुरुपदयोरर्पित स्वात्मभारम्।

---

**Attention:** New letters have been introduced to facilitate reading Tamil texts in Devanaagarii. Distinction has been made between certain short and long consonants that do not exist in Devanaagarii. For e.g., नॆ and ने should be treated with the same distinction as that exists between नि and नी. The letters ऎ and ए, and ऒ and ओ, should be treated in the same way. The letter ऴ denotes the *za* in Tamil. For e.g., *aazvaar* would be written as आऴ्वार् in Devanaagarii. There is a subtle difference between ऱ and र, however, they can be pronounced in the same way. Also note that ऱ्ऱ sounds almost like ट्, ऱ्ऱि like टि्, and so on. The consonant-cluster न्ऱ is pronounced somewhere between न्र and न्ड्. It is, however, colloquially acceptable to pronounce the clusters ऱ्ऱ and न्ऱ as त्त and न्न, respectively.

श्रीमच्छ्रीरङ्गनाथाह्वयमुनिकृपया प्राप्तमोक्षाश्रमं तं
श्रीमद्वेदान्तरामानुजमुनिमपरं संश्रये देशिकेन्द्रम्॥ ४ ॥

श्रीमद्वेदवतंसलक्ष्मणमुनेः प्राप्तागमान्तद्वयं
तेन श्रीरघुपुङ्गवाङ्घ्रियुगळे न्यस्तात्मरक्षाभरम्।
श्रीमच्छ्रीनिधियोगिवर्य करुणालब्धाब्जचक्राङ्कनं
वन्दे शान्तिविरक्तिपूर्णमनघं श्रीरङ्गनाथं गुरुम्॥ ५ ॥

श्रीमद्वेदान्तरामानुजयतिनृपतेर्लब्धवेदान्तयुग्मं
श्रीमद्देवाधिनेतुश्चरणसरसिजे तेन दत्तात्मभारम्।
श्रीमच्छ्रीवासयोगीश्वर महितमहासंप्रदायैकनिष्ठं
वन्दे श्रीवासयोगीश्वरगुरुमनघं वत्सलं भव्यशीलम्॥ ६ ॥

श्रीमच्छ्रीवास योगीश्वरपदविनतं लब्धवेदान्तयुग्मं
श्रीपादुसेविरामानुजमुनितिलकात्तत्पदन्यस्तभारम्।
श्रीमच्छ्रीवासरामावरजमुनिमणेर्लब्ध मोक्षाश्रमं तं
श्रीमद्वेदान्तरामानुजयतिनृपतिं संश्रये ज्ञानवार्द्धिम्॥ ७ ॥

श्रीमच्छ्रीवासयोगिप्रवरसकरुणापाङ्गसङ्गादभङ्गात्
वेदान्तद्वन्द्वविद्या मधुरसलहरीचञ्चरीकायमाणः।
तेनाचार्येण रङ्गप्रभुचरणयुगे दत्तरक्षाभरश्रीः
श्रीमच्छ्रीवासरामावरजमुनिमणिस्सन्ततं श्रेयसे स्यात्॥ ८ ॥

श्रीमन्नाथमुनीन्द्रयामुनमुनिश्रीसंयमीन्द्रात्मनः
श्रीश्रीवासमुनीन्द्रदेशिकमणेः प्राप्तागमान्तद्वयम्।
श्रीरङ्गेशपदे तदर्पितभरं श्रीपादुकासेवक
श्रीरामानुजयोगिनं गुरुवरं वन्दे दयासागरम्॥ ९ ॥

श्रीरङ्गेशपदे समर्पितभरं श्रुत्यन्तरामानुज
श्रीयोगीन्द्रगुरूत्तमेन यमिनश्श्रुत्यन्तविद्यात्मनः।
प्राप्तश्रुत्यवतंसयुग्महृदयं श्रीवासरामानुजात्
श्रीश्रीवासमुनीन्द्रदेशिकमणिं श्रेयोनिधिं संश्रये॥ १० ॥



prapatti.com

श्रीमद्गोपालसूरेर्निरवधिकरुणावाप्तसत्संप्रदायं
श्रीमद्वेदान्तरामानुजयतिनृपतिस्सर्वतः स्थापयित्वा।
यस्मिन्सत्संप्रदायं सकलमुपदिशन्नंशतोऽनुप्रविष्टः
श्रीमच्छ्रीवासरामानुजमुनिमनघं तं भजे देशिकेन्द्रम्॥ ११॥

गोपालदेशिकपदाब्जमधुव्रतस्य
प्रज्ञाविरक्तिकरुणामुखसद्गुणाब्धेः।
वेदान्तलक्ष्मणमुनेः श्रितभागधेयं
पादारविन्दयुगळं शरणं प्रपद्ये॥ १२॥

श्रीकृष्णदेशिकपदाम्बुजभृङ्गराजं
वेदान्तलक्ष्मणमुनीन्द्रकृपात्तबोधम्।
त्रय्यन्तदेशिक यतीन्द्र शठारि मूर्तिं
गोपालदेशिकशिखामणिमाश्रयामः॥ १३॥

श्रीरङ्गनाथगुरुपादसरोजहंसं
वेदान्तदेशिकपदाम्बुजभृङ्गराजम्।
श्रीमद्यतीन्द्रशठकोपदयावलम्बं
वेदान्तलक्ष्मणमुनिं शरणं प्रपद्ये॥ १४॥

कल्याणावहमस्माकं कारुण्यकलशाम्बुधेः।
प्रपद्ये रङ्गनाथस्य पदपङ्कजतल्लजम्॥ १५॥

श्रीवीरराघवगुरोस्तनयं ततश्च
शारीरकादि समधीत्य समस्तशास्त्रम्।
विद्योतमानमनवद्यगुणैकतानं
श्रीरङ्गनाथगुरुवर्यमहं प्रपद्ये॥ १६॥

श्रीवेङ्कटेशगुरुणा करुणाकरेण
श्रीशे समर्पितभरं श्रितपारिजातम्।
श्रीरङ्गनाथगुरुवीक्षण लब्ध बोधं
श्रीवीरराघवगुरुं शरणं प्रपद्ये॥ १७॥

वत्सवंशपयोधीन्दोः कल्याणगुणवारिधेः।
श्रीमतो वेङ्कटेशस्य चरणौ शरणं भजे॥ १८ ॥

श्रीमतो रङ्गनाथस्य गुणैर्दास्यमुपागतम्।
रामानुजं द्वितीयं तमद्वितीयमुपास्महे॥ १९ ॥

श्रीतातगुरुसेवात्तवेदान्तयुगळाशयः।
वात्स्यानन्तगुरुःश्रीमान् श्रेयसे मेऽस्तु भूयसे॥ २० ॥

श्रीशैलपूर्णकुलवारिधिपूर्णचन्द्रं
श्रीश्रीनिवास गुरुवर्यपदाब्जभृङ्गम्।
श्रेयोगुणाम्बुनिधिमाश्रितपारिजातं
श्रीतातयार्यमनघं शरणं प्रपद्ये॥ २१ ॥

श्रीमच्छठारिमुनिपाद सरोजहंसं
श्रीमत्पराङ्कुशतपोधन लब्धबोधम्।
श्रीमन्नृसिंहवरदार्य दयावलम्बं
श्रीमत्पराङ्कुशमुनिं प्रणतोऽस्मि नित्यम्॥ २२ ॥

श्रीमद्वरदविष्ण्वार्य पदपङ्कजषट्पदम्।
अहोबिल गुरुं वन्दे वत्सवंशैकमौक्तिकम्॥ २३ ॥

महादयाधीशितुरम्बुजाक्षनिध्यान नित्याभिनिविष्टबुद्धेः।
अज्ञाननिग्राहकमञ्जसाऽहं अस्मद्गुरोरङ्घ्रियुगं प्रपद्ये॥ २४ ॥

महादयाधीशगुरोस्तनयं तत्वविद्वरम्।
वन्दे वरदविष्ण्वार्यं वात्सल्यादि गुणार्णवम्॥ २५ ॥

नमो वरदविष्ण्वार्य नयनानन्ददायिने।
वात्स्याय वरदार्याय वादिनीहारभास्वते॥ २६ ॥

पर्यायभाष्यकाराय प्रणतार्तिं विधून्वते।
ब्रह्मतन्त्रस्वतन्त्राय द्वितीयब्रह्मणे नमः॥ २७ ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तं सदा हृदि॥ २८ ॥

यस्मादस्माभिरेतद्यतिपति कथितप्राक्तनप्रक्रियोद्य–
त्कर्मब्रह्मावमर्श प्रभवबहुफलं सार्थमग्राहि शास्त्रम्।
तं विष्वग्भेद विद्यास्थितिपदविषयस्थेयभूतं प्रभूतं
वन्देयात्रेयरामानुज गुरुमनघं वादिहंसाम्बुवाहम्॥ २९ ॥

रामानुजार्यतनयं रमणीयवेषम्
आत्रेयमात्मगुणपूर्णमनर्घशीलम्।
श्रीरङ्गराजमिवतद्दयया्ऽवतीर्णं
श्रीरङ्गराजगुरुवर्यमहं प्रपद्ये॥ ३० ॥

आत्रेयगोत्राम्बुधिपूर्णचन्द्रं आचारयुक्तात्मगुणोपपन्नम्।
नतार्तिहृद्देशिक रत्नसूनुं रामानुजार्यं गुरुमाश्रयामः॥ ३१ ॥

आत्रेयगोत्रसंभूतम् आश्रये श्रितवत्सलम्।
यतीन्द्रमाहानसिकं प्रणतार्तिहरं गुरुम्॥ ३२ ॥

प्रणामं लक्ष्मणमुनिः प्रतिगृह्णातु मामकम्।
प्रसाधयति यत्सूक्तिः स्वाधीनपतिकां श्रुतिम्॥ ३३ ॥

दयानिघ्नं यतीन्द्रस्य देशिकं पूर्णमाश्रये।
येन विश्वसृजो विष्णोरपूर्यत मनोरथः॥ ३४ ॥

विगाहे यामुनं तीर्थं साधुबृन्दावने स्थितम्।
निरस्तजिह्मगस्पर्शे यत्र कृष्णः कृतादरः॥ ३५ ॥

अनुज्झित क्षमायोगम् अपुण्यजनबाधकम्।
अस्पृष्टमदरागं तं रामं तुर्यमुपास्महे॥ ३६ ॥

नमस्याम्यरविन्दाक्षं नाथभावे व्यवस्थितम्।
शुद्धसत्वमयं शौरेः अवतारमिवापरम्॥ ३७ ॥

नाथेन मुनिना तेन भवेयं नाथवानहम्।
यस्य नैगमिकं तत्वं हस्तामलकतां गतम्॥ ३८ ॥

यस्य सारस्वतस्रोतो वकुळामोदवासितम्।
श्रुतीनां विश्रमायालं शठारिं तमुपास्महे॥ ३९ ॥

वन्दे वैकुण्ठसेनान्यं देवं सूत्रवतीसखम्।
यद्वेत्रशिखरस्पन्दे विश्वमेतद्व्यवस्थितम्॥ ४० ॥

सहधर्मचरीं शौरेः सम्मन्त्रित जगद्धिताम्।
अनुग्रहमयीं वन्दे नित्यमज्ञात निग्रहाम्॥ ४१ ॥

कमप्याद्यं गुरुं वन्दे कमलागृहमेधिनम्।
प्रवक्ताछन्दसां वक्ता पञ्चरात्रस्य यस्स्वयम्॥ ४२ ॥

विगाहे निगमान्तार्य विष्णुपादसमुद्भवाम्।
रहस्यत्रयसाराख्यां तिस्रोत समकल्मषाम्॥ ४३ ॥

अविज्ञातं विजानतां विज्ञातम् अविजानताम्।
रहस्यत्रयसाराख्यं परंब्रह्मास्तु मे हृदि॥ ४४ ॥

शीरॊन्ऱु तूप्पुल् तिरुवेङ्गडमुडैयान्
    पारॊन्ऱच्चॊन्न पळमॊळियुळ् – ओरॊन्ऱु
ताने अमैयादो तारणियिल् वाळ्वार्क्कु
    वानेऱ प्पोमळवुम् वाळ्वु॥ ४५ ॥

वैशाखे रोहिणीजातं काश्यपान्वयवारिधेः।
इन्दुं श्रीपुण्डरीकांशं गोष्ठीपूर्णमहं भजे॥ ४६ ॥



prapatti.com